**PG/IVS/SAN/404(A, B, C)/24**
**(New)**

# M.A. 4th Semester Examination, 2024

## SANSKRIT

PAPER – SAN-404(A, B & C)(New)

*Full Marks* : 50

*Time* : 2 hours

*The figures in the right hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

*Illustrate the answers wherever necessary*

## PAPER — SAN-404(A)

## GROUP—A

( *Literature* )

सर्वे प्रश्नाः संस्कृतेन देवनागर्या च समाधेया :

## क — विभाग

1. एकः समाधेयः — 10 × 1

(क) श्रीहरिदाससिद्धान्तवागीशविरचितस्य रुक्मिणीहरण-महाकाव्यस्य द्वितीयसर्गसारः संक्षेपेण लिख्यताम् ।

(ख) राजा भीष्मकः कस्याधिपतिः आसीत् ? तस्य राज्ञः चरित्रचित्रणं प्रथमसर्गत्रयमाश्रित्य क्रियताम् ।

2. सप्रसङ्गमेको व्याख्येयः — 5

(क) श्रियाश्रितः सकलतनौ तनुनपान्महामहाबहुतरचक्रधारकः ।
उरःस्थले परिलसदेकश्रियं जहास यो मधुरिपुमेकचक्रकम् ॥

(ख) कन्यामथान्यां प्रति दानमेषा तदिष्टामिष्टं ददती शिशिक्षे ।
यादृक्स्वभावा हि परे भवेयुस्तद्योग्यखेलाय चलन्ति बालाः ॥

## ख — विभागः

3. एकः समाधेयः — 10 × 1

(क) का नाम प्रस्तावना ? अमरमङ्गलनाटके कीदृशी प्रस्तावना दृश्यते ? सा यथोपयुक्तं न वेति विचार्यताम् ।

(ख) अमरमङ्गलं केन विरचितम् ? तत्र कति अङ्काः सन्ति ? प्रथमाङ्कस्य नाम किम् ? तत्र वीरायाः राजान्तः पुरे केन प्रकारेण प्रवेशो जातः इति आलोच्यताम् ।

**4.** सप्रसङ्गमेको व्याख्येयः — 5

(क) मृताप्यमृतनिष्यन्दा निष्पदापि चतुष्पदा ।
अवर्णा बहुवर्णापि माता गौरस्तु वः श्रिये ॥

(ख) आजीवनं भवदुपासनमेव धर्मस्त्वद्गौरवाय मरणञ्च सुखं यदीयम् ।
तेषां त्वदभ्युदय-दर्शन-वञ्चितानां मातर्दयस्व तनुजेषु भव प्रसन्ना ॥

## ग — विभागः

**5.** एकः समाधेयः — 10 × 1

(क) अपराजितेति लघुकथा केन विरचिता ? तत्र विजयायाः चारित्रिकं वैशिष्ट्यमालोच्यताम् ।

(ख) नारीणां कार्यालयगमनविषये कीदृशो मनोभावोऽपराजितायां प्राप्यते ? तत्र लिङ्गवैषम्यविषये वा का वार्ता उपलभ्यते-विचार्यताम् ।

## [ Internal Assessment — 10 Marks ]

# PAPER – SAN-404(B)

## GROUP–B

### ( *Vyākāraṇa* )

सर्वे प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः

**1.** यथानिर्देशमुत्तरं दीयताम् — 10

(*क*) प्रातिशाख्यमिति पदं कथं सिध्यति ? ऋक्प्रातिशाख्ये प्रथमपटलस्यालोचनायानां विषयाणां विवरणं प्रदेयम् ।

*अथवा*

शौनकसम्मतमनुस्वारस्वरूपं निपुणं पर्यालोच्यताम् ।

(*ख*) कविरहस्यम् — इति ग्रन्थस्य प्रणेता कः ? ग्रन्थस्य मङ्गलाचरणे कस्य स्तुतिर्विहिता ? मङ्गलश्लोकस्याशयः मुख्यं फलञ्च आलोच्येताम् । 10

*अथवा*

कविरहस्यग्रन्थस्य विषयपर्यालोचनपूर्वकं वैशिष्ट्यानि प्रदर्शनीयानि ।

**2.** यथानिर्देशमुत्तरं दीयताम् —

(क) यथेच्छं द्वयस्य व्याख्या कार्या — 5 × 2

(*i*) आत्मा बुद्ध्या समेत्यार्थान्मनो युङ्क्ते विवक्षया ।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ।।

(*ii*) कण्ठे माध्यन्दिनयुगं मध्यमं त्रैष्टुभानुगम् ।
तारं तार्तीयसवनं शीर्षण्यं जागतानुगम् ।।

(*iii*) व्याघ्री यथा हरेत्पुत्रान्दंष्ट्राभ्यां न च पीडयेत् ।
भीता पतनभेदाभ्यां तद्वद्वर्णान्प्रयोजयेत् ।।

(ख) सप्रसङ्गं द्वयस्य व्याख्या कार्या — 5 × 2

(*i*) परावरे ब्रह्मणि यं सदाहु-
र्वेदात्मानं वेदनिधिं मुनीन्द्राः ।
तं पद्मगर्भं परमं त्वादिदेवं
प्रणम्यर्चां लक्षणमाह शौनकः ।।

(*ii*) अस्त्यगस्त्यमुनिजोत्स्ना-पवित्रे दक्षिणापथे ।
कृष्णराज इति ख्यातो राजा साम्राज्यदीक्षितः ।।

(*iii*) कायो न जीर्य्यति जृणाति न यस्य शक्ति-
र्नो जुर्य्यते भुजबलं न जिनाति तेजः ।
यद्विद्विषां जरति चेतासि भोगतृष्णा
तेषां वपूंषि विपिनेषु च जारयन्ति ।।

**[ Internal Assessment — 10 Marks ]**

# PAPER – SAN-404(C)

## GROUP–C

## ( *Indian Philosophy* )

(सर्वे प्रश्नाः संस्कृतेनैव समाधेयाः )

### विभाग — क

1. एकः प्रश्नः समाधेयः — 10 × 1

(क) मीमांसान्यायप्रकाशानुसारं धर्मलक्षणं निरुप्यताम् । तत्र यागादिः कथं धर्मः भवितुमर्हति इति विचार्यताम् ।

(ख) को नाम विधिः ? को गुणविधिः ? को वा विशष्ट विधिः ? उभयत्र उदाहरणं दीयताम् । विशिष्टविधौ मत्त्वर्थलक्षणा कथं करणीया इति आलोच्यताम् ।

2. द्वयोर्व्याख्या कार्याः — 5 × 2

(क) उत्पत्तिविधिः ।

(ख) श्रूतिः ।

(ग) लिङ्गम् ।

## विभाग — ख

**3.** एकः प्रश्नः समाधेयः — 10 × 1

(क) शांकरभाष्यानुसारतः ब्रह्मणः तटस्थलक्षणं प्रतिपादयत ।

(ख) "ब्रह्मप्रसिद्धमप्रसिद्धं वा स्यात् ? यदि प्रसिद्धं न जिज्ञासितव्यम् । अथ अप्रसिद्धं नैव शक्यं जिज्ञासितुम् इति" इति भाष्यांशे पूर्वपक्षस्य मतं शंकराचार्यानुसारं खण्डयत ।

**4.** द्वयोर्व्याख्या कार्या: — 5 × 2

(क) अभातो ब्रह्मजिज्ञासा ।

(ख) धर्मब्रह्मजिज्ञासयोः फलजिज्ञास्यभेदाच्च ।

(ग) साधनचतुष्टयम् ।

**[ Internal Assessment — 10 Marks ]**

---